योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ११०

दशाधिकशततमः सर्गः ११०

श्रीवसिष्ठ उवाच ।

पुरोपकण्ठसंप्राप्तैश्चतुर्दिक्कं सहारिभिः ।

एतस्मिन्नन्तरे तत्र प्रवृत्तं दारुणं रणम् ।। १

लुण्ठितग्रामनगरं प्रजाकुलमहाकुलम् ।

अग्निदाहज्वलद्देहं धूमाभ्रपटलावृतम् ।। २

शरजालमहाधूमच्छन्नार्कविलसत्तमः ।

क्षिप्रदृष्टरवि क्षिप्रमदृष्टरविमण्डलम् ।। ३

अग्निदाहमहातापप्रतपत्पर्णकाननम् ।

लोलालातलताशलमुसलोपलपूर्णखम् ।। ४

अनलप्रतिबिम्बौघैर्द्विगुणज्वलनायुधम् ।

रणभग्नमहाशूरप्राप्तेन्द्रवनितासुधम् ।। ५

उद्दामवारणारावै रणलम्पटहर्षदम् ।

भुशुण्डीमण्डलप्रासशूलतोमरवर्षदम् ।। ६

भटकोलाहलोल्लासहृद्भङ्गमृतपामरम् ।

रजःपटलशुभ्राभ्रकृतद्युपथवारणम् ।। ७

मरणव्यग्रसामन्तमुक्तनादव्रजद्रजम् ।

इतश्चेतश्च निपतद्वैद्युतोपहतप्रजम् ।। ८

अग्निदग्धपतद्देहप्रोज्झिताग्निमयाम्बुदम् ।

मरणाह्लाददासंख्यशरधारामयाम्बुदम् ।। ९
जितसागरकल्लोलं तुरङ्गमतरङ्गकैः ।
दन्तिदन्तविनिष्पेषतारक्रेंकारकर्कशम् ।। १०
कोटकोटिकुटीकुड्यकण्टकोद्भटसद्भटम् ।
चठत्कुण्ठितकोटाट्टकृटाटननटच्छटम् ।। ११
लुठत्पटनकुट्टाकसाटोपस्फुटपट्टिशम् ।
खे वटत्केतुपट्टाट्टपटत्पटपटारवम् ।। १२
दन्तिदन्तगुणोद्गीर्णैर्हेतिपाषाणघर्षणैः ।
तारक्रेंकारहुंकारैराहूतसुरवारणम् ।। १३
वहच्छरनदीपूरपूर्णाम्बरमहार्णवम् ।
विचलच्चक्रकुन्तासिधारामकरकर्कशम् ।। १४
उन्नादयोधसंघट्टकंकटोत्कटटांकृतैः ।
लसज्झणझणारावैर्घटितद्वीपमण्डलम् ।। १५
पादपातपरापिष्टशरसंजातकर्दमम् ।
वहद्रक्तनदीरंहःप्रोह्यमाणरथद्विपम् ।। १६
सुपर्णहेलानिपतत्प्रोत्पतत्पट्टपट्टिशम् ।
शरवारितरङ्गार्तभग्नायुधजलेचरम् ।। १७
हेतिसंघट्टनिष्क्रान्तज्वालाप्रज्वलिताम्बरम् ।
वलीपलितनिर्मुक्तशूराक्रान्तत्रिविष्टपम् ।। १८
पाण्डुपांसुपयोवाहकचच्चक्राचिरद्युति ।
हेतिनिर्विवराकाशयुधानाधारभूतलम् ।। १९
कटद्भटभटाटोपरटत्प्रतिभटोत्कटम् ।
चटच्छकटसंघट्टपिष्टकाष्ठलुठद्रथम् ।। २०
कबन्धभटवेतालमिश्रकण्टकसंकटम् ।
वेतालभुज्यमानाग्र्यशवमांसहृदम्बुजम् ।। २१
शूरशातितशीरार्धशिरःकरखुरोरुकम् ।

कबन्धदोर्द्रुमस्पन्दवनीकृतनभस्तलम् ।। २२

तरल्लोलास्यवेतालहासघट्टितपेटकम् ।

कंकटोत्कटसाटोपभटभ्रुकुटिभीषणम् ।। २३

एकान्तमारणैकान्तमरणैकान्तभूषणम् ।

प्रहारदानग्रहणकार्पण्यापारदूषणम् ।। २४

शूरवारणसामन्तमदवारिविशोषणम् ।

मारणैकान्तरसिककृतान्तानन्दपोषणम् ।। २५

अविकत्थनगुप्तानां शूराणां जयघोषणम् ।

अशूराणां च गुप्तानां प्रभावुद्धोषणं परम् ।। २६

शौर्यादीनां प्रसुप्तानां स्वगुणानां प्रबोधनम् ।

धनमाधारभूतानां राष्ट्रेषु भुजशालिनाम् ।। २७

दन्त्यारूढरथास्फोटप्रभग्नकटवारणम् ।

समस्तमत्तगन्धेभदानवारिनिवारणम् ।। २८

सारसारवसामन्तमुक्तमत्तमतङ्गजम् ।

जरज्जितकरानीककल्पितासीकवेदनम् ।। २९

दिनं दिनकरस्येव नृपस्य शरणं गतम् ।

अनागतभटव्रातपिष्टार्धमृतमानवम् ।। ३०

मानवायुबलोन्मत्तनतप्रारब्धकुट्टनम् ।

धनानां प्राणपण्यानां नवमापणपत्तनम् ।। ३१

पटनद्धपताकौघजातसंचारिदोर्द्रुमम् ।

रक्तोज्ज्वलत्वात्त्रैलोक्यलक्ष्म्या भूषणविद्रुमम् ।। ३२

मन्दराहननोद्भूतक्षीरोदजलसुन्दरैः ।

छत्रैश्छादितहेत्योघपुष्पाढ्यगगनाङ्गनम् ।। ३३

गणगीर्वाणगन्धर्वगीतशूराशयं कृतम् ।

तद्धातरलतालाग्रहेतिहालाहलायुधम् ।। ३४

संघप्रहरणासंख्ययातुधानाझणज्झणम् ।

भुक्त्वा चाद्रिगुहागेहपूरितापूर्वदुर्द्रुमम् ।। ३५

कचत्कुन्तवनव्यस्तशिरःकरवृताम्बरम् ।

क्षेपणोन्मुक्तपाषाणपूरप्लुतककुब्लतम् ।। ३६

महाचटचटाशब्दस्फुटद्रववृहद्द्रुमम् ।

नारीहलहलारावरणन्नगरमन्दिरम् ।। ३७

मन्दरावानलाकारनभोभातायुधव्रजम् ।

परित्यज्य धनं गेहं दूरोर्वीविद्रुतप्रजम् ।। ३८

सर्वतोहेतिवहनात्समक्षप्रेक्षकोज्झितम् ।

वर्जितं भीरुभिः पक्षिराजवृन्दमिवाहिभिः ।। ३९

दन्तिदन्तविनिष्पिष्टशिष्टसद्भटसंकटम् ।

कटे मृत्योरिव नरद्राक्षापीडनयन्त्रके ।। ४०

यन्त्रपाषाणसंघट्टपिष्टाम्बरगतायुधम् ।

योधनादनदद्दन्तिवृन्दबन्धुरकन्दरम् ।। ४१

धराधरदरीरन्तःप्रतिश्रुत्प्रोतगर्जितम् ।

अर्जितं प्राणसर्वस्वमर्जयद्भिरुपार्जितम् ।। ४२

भर्जितं हेतिदहनैरग्निदाहैश्च संततैः ।

तैरेवान्यैरथान्यैश्च द्वन्द्वयुद्धैरनिष्ठितम् ।। ४३

वेष्टितं मृतशिष्टैश्च सारैः सुभटपेटकैः ।

कैलासैरिव संशुद्धैरीश्वराधारतां गतैः ।। ४४

तैरुदारैः समाक्रान्तं ये मृत्योरपि मृत्यवः ।

मरणं जीवितं येषां जीवितं मरणं रणे ।। ४५

रणे नभसि निर्लूनवरवारणवारिजे ।

सारसाः सरसीवात्र रेजुरत्युद्भटा भटाः ।। ४६

यन्त्राश्मक्षेपणानां प्रसरणसरितां

घूकृतैः फूत्कृतैर्द्राक्

क्रान्तानां व्योम्नि मूर्ध्नां शरसलिलमुचां

सैनिकानां च नादैः ।

टांकारैरायुधानां नभसि विसरता-

मश्वचक्रेभशब्दै-

रासीन्निःसंधिबन्धोपलजठरजडं

जीर्णकर्णं गतं तत् ।। ४७

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वा० उ० अविद्यो० विप० संग्रामवर्णनं नाम दशाधिकशततमः सर्गः

।। ११० ।।